## ५ – अङ्गस्य सिद्ध–तिङ्प्रत्ययानां च संयोजनम्

एतावता सार्वधातुकलकाराणां (लट्, लोट्, लङ्, विधिलिङ् इत्येषाम्) अङ्गम् अदन्तं यत्र, तत्र अङ्गं निष्पन्नम् अपि च सिद्ध–तिङ्प्रत्ययाः प्राप्ताः | अधुना तयोः संयोजनं क्रियते; फलं तिङन्तपदं—लोके विख्यातं क्रियापदम् |

अत्र अस्ति दीक्षितपुष्पा–महोदयायाः पद्धतेः वैलक्षण्यम् | अङ्गम् अदन्तं चेत्, एकवारं लटि, लोटि, लङि, विधिलिङि च अङ्गस्य सिद्ध–तिङ्प्रत्ययानां च संयोजनं परिशील्य, अग्रे भ्वादिगणे, दिवादिगणे, तुदादिगणे, चुरादिगणे—एषु चतुर्षु लकारेषु सर्वाणि रूपाणि ज्ञास्यन्ते | भव, नृत्य, लिख, चोरय एतानि अङ्गानि सर्वाणि अदन्तानि इति कारणेन यद्यपि भिन्न–धातुगणेषु सन्ति, परन्तु कार्यं पूर्णतया समानम् | अतः अस्य पाठस्य अनन्तरं यदा भ्वादिगणस्य, दिवादिगणस्य, तुदादिगणस्य, चुरादिगणस्य च क्रमेण वैशिष्ट्यम् अवलोकयिष्यामः, तदा केवलम् अदन्तम् अङ्गं निर्मातव्यम् अस्माभिः | ततः चतुर्णां धातुगणानां सर्वेषां धातूनाम् (997+140+157+409 = 1703) लटि, लोटि, लङि, विधिलिङि च सर्वाणि रूपाणि ज्ञायन्ते | भवति, भवतु, अभवत्, भवेत् इति यथा, तथैव नृत्यति, नृत्यतु, अनृत्यत् , नृत्येत्; लिखति, लिखतु, अलिखत्, लिखेत्; चोरयति, चोरयतु, अचोरयत्, चोरयेत् | अतः अग्रिमेषु पाठेषु केवलं लट्–लकारस्य प्रथमपुरुषैकवचनान्तरूपं 'भवति' प्रदर्श्यते | ततः अग्रे सर्वं बुद्धम् एव !

### सूत्राणि

अङ्गस्य सिद्ध–तिङ्प्रत्ययानां च मेलनार्थम् अपेक्षितानि सूत्राणि इमानि—

**अतो गुणे** (६.१.९७)
**अमि पूर्वः** (६.१.१०७)
**अदेङ् गुणः** (१.१.२)
**अतो दीर्घो यञि** (७.३.१०१)
**वृद्धिरेचि** (६.१.८८)
**लुङ्लङ्लृङ्क्ष्वडुदात्तः** (६.४.७१)
**ससजुषो रुः** (८.२.६६)
**खरवसानयोर्विसर्जनीयः** (८.३.१५)
**आद्गुणः** (६.१.८७)
**आडजादीनाम्** (६.४.७२)
**आटश्च** (६.१.९०)

### अङ्गस्य तिङ्प्रत्ययस्य च संयोजन–कार्यम्

कार्यार्थम् अधः यत्र कस्यचित् सूत्रस्य आवश्यकता अस्ति, तत्र दक्षिणतः सूत्रं दत्तम् | किमपि सूत्रं न लिखितं चेत्, केवलं द्वयोः अंशयोः संमेलनं भवति | यथा पठ + ति = पठति — अत्र केवलम् अंशयोः संयोजनं; कस्यापि सूत्रस्य आवश्यकता नास्ति |

A. परस्मैपदे अङ्ग–तिङ्प्रत्यय–संयोजनम्

परस्मैपदे धातुः = पठ्, अङ्गम् = पठ

१. लट्–लकारः

लटि सिद्ध–तिङ्प्रत्ययाः—

ति तः अन्ति
सि थः थ
मि वः मः

कार्यम्—
पठ + ति = पठति
पठ + तः = पठतः
पठ + अन्ति = पठन्ति **अतो गुणे** (६.१.९६) [गुणः = अ, ए, ओ]
पठ + सि = पठसि
पठ + थः = पठथः
पठ + थ = पठथ
पठ + मि = पठामि **अतो दीर्घो यञि** (७.३.१०१) [= यञ्–आदि–सार्वधातुकः प्रत्ययः परः चेत्, अदन्त–अङ्गस्य अन्तिमस्वरः दीर्घः भवति ।]
पठ + वः = पठावः **अतो दीर्घो यञि** (७.३.१०१)
पठ + मः = पठामः **अतो दीर्घो यञि** (७.३.१०१)

**अतो गुणे** (६.१.९७) = अपदान्तात् अतः गुणे परे पूर्वपरयोः स्थाने एकः पररूपमेकादेशः स्यात् । गुणः इत्युक्तौ अ, ए, ओ । इदं सूत्रं **वृद्धिरेचि** (६.१.८८), **अकः सवर्णे दीर्घः** (६.१.१०१) इत्यनयोः अपवादसूत्रम् । अतः पञ्चम्यन्तं, गुणे सप्तम्यन्तं, द्विपदमिदं सूत्रम् । **उस्यपदान्तात्** (६.१.९६) इत्यस्मात् **अपदान्तात्** अपि च **एङि पररूपम्** (६.१.९४) इत्यस्मात् **पररूपम्** इत्यनयोः अनुवृत्तिः । **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः । अनुवृत्ति–सहितसूत्रम्— **अपदान्तात् अतः गुणे पूर्वपरयोः एकः पररूपं संहितायाम्** ।

**अदेङ्गुणः** (१.१.२) = ह्रस्व–अकारः, एकारः, ओकारः (एङ्) एषां वर्णानां गुणसंज्ञा स्यात् । अत् एङ् च गुणसंज्ञः स्यात् इति । अत् च एङ् च अदेङ् । अदेङ् प्रथमान्तं, गुणः प्रथमान्तं, द्विपदमिदं सूत्रम् । सूत्रं स्वयं सम्पूर्णम्— **अत् एङ् गुणः** ।

**वृद्धिरेचि** (६.१.८८) = अवर्णात् एचि परे पूर्वपरयोः स्थाने वृद्धिसंज्ञक–एकादेशः स्यात् । वृद्धिः प्रथमान्तम्, एचि सप्तम्यन्तं,

द्विपदमिदं सूत्रम् | **आद्गुणः** (६.१.८७) इत्यस्मात् आत् इत्यस्य अनुवृत्तिः; **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्— **आत् एचि पूर्वपरयोः एकः वृद्धिः संहितायाम्** |

**अकः सवर्णे दीर्घः** (६.१.१०१) = अक्–वर्णात् सवर्णे अचि परे पूर्वपरयोः स्थाने दीर्घसंज्ञक–एकादेशः स्यात् | अक् प्रत्याहारः = अ, इ, उ, ऋ, ऌ | अकः पञ्चम्यन्तं, सवर्णे सप्तम्यन्तं, दीर्घः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **इको यणचि** (६.१.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः; **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अकः सवर्णे अचि पूर्वपरयोः एकः दीर्घः संहितायाम्** |

**अतो दीर्घो यञि** (७.३.१०१) = अदन्ताङ्गस्य दीर्घत्वं यञादि–सार्वधातुकप्रत्यये परे | यञ् प्रत्याहारः = य व र ल ञ म ङ ण न झ भ | अतः षष्ठ्यन्तं, दीर्घः प्रथमान्तं, यञि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **तुरुस्तुशम्यमः सार्वधातुके** (७.३.९५) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते ह्रस्व–अकारः अस्ति; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य स्थाने आदेशः; **यस्मिन् विधिस्तदादावल्ग्रहणे** (१.१.७२, वार्तिकम् २९) इत्यनेन **यञि सार्वधातुके** इत्युक्तौ यञादि–सार्वधातुके | अनुवृत्ति–सहितसूत्रम्— **अतः अङ्गस्य दीर्घः यञि सार्वधातुके** |

२. <u>लोट्–लकारः</u>

लोटि सिद्ध–तिङ्प्रत्ययाः—
तु, तात् ताम् अन्तु
०, तात् तम् त
आनि आव आम

कार्यम्—
पठ + तु = पठतु
पठ + ताम् = पठताम्
पठ + अन्तु = पठन्तु **अतो गुणे** (६.१.९७)
पठ + ० = पठ
पठ + तम् = पठतम्
पठ + त = पठत
पठ + आनि = पठानि **अकः सवर्णे दीर्घः** (६.१.१०१)
पठ + आव = पठाव **अकः सवर्णे दीर्घः** (६.१.१०१)
पठ + आम = पठाम **अकः सवर्णे दीर्घः** (६.१.१०१)

३. <u>लङ्–लकारः</u>

लङि सिद्ध–तिङ्प्रत्ययाः—

त्   ताम्   अन्

स्   तम्   त

अम्   व   म

अ + पठ = अपठ इति अङ्गम् **लुङ्लङ्लृङ्क्ष्वड्डुदात्तः** (६.४.७१)

कार्यम्—

अपठ + त् = अपठत्

अपठ + ताम् = अपठताम्

अपठ + अन् = अपठन्   **अतो गुणे** (६.१.९७)

अपठ + स् = अपठः   **ससजुषोरुः** इत्यनेन स्–स्थाने रु, **खरवसानयोर्विसर्जनीयः** इत्यनेन रु–स्थाने विसर्गः

अपठ + तम् = अपठतम्

अपठ + त = अपठत

अपठ + अम् = अपठम्   **अतो गुणे** (६.१.९७)

अपठ + व = अपठाव   **अतो दीर्घो यञि** (७.३.१०१)

अपठ + म = अपठाम   **अतो दीर्घो यञि** (७.३.१०१)

**लुङ्लङ्लृङ्क्ष्वड्डुदात्तः** (६.४.७१) = लुङ् लङ् लृङ् च परं चेत्, धातुरूपि–अङ्गस्य अट्–आगमो भवति; स च अडागमः उदात्त–संज्ञकः | **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन अङ्गात् प्राक् आयाति | लुङ् च लङ् च लृङ् च तेषामितरेतरद्वन्द्वः लुङ्लङ्लृङः, तेषु लुङ्लङ्लृङ्क्षु | लुङ्लङ्लृङ्क्षु सप्तम्यन्तम्, अट् प्रथमान्तम्, उदात्तः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य अट् उदात्तः लुङ्लङ्लृङ्क्षु** |

**अमि पूर्वः** (६.१.१०५) = अकः अम्यचि परतः पूर्वरूपमेकादेशः स्यात् | अमि विद्यमानो योऽच् तस्मिन् परे इत्यर्थः | अमि सप्तम्यन्तं, पूर्वः प्रथमान्तं, द्विपदमिदं सूत्रम् | **अकः सवर्णे दीर्घः** ( ६.१.९९) इत्यस्मात् सूत्रात् अकः इत्यस्य अनुवृत्तिः | **एकः पूर्वपरयोः** (६.१.८३), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | **इको यणचि** ( ६.१.७६) इत्यस्मात् सूत्रात् अचि इत्यस्य अनुवृत्तिः | **यस्मिन् विधिस्तदादावल्ग्रहणे** (१.१.७२, वार्तिकम् २९) इत्यनेन अचि अमि इत्युक्तौ अजादौ अमि इत्यर्थः | अनुवृत्ति सहितसूत्रम् — **अकः अचि अमि पूर्वपरयोः एकः पूर्वः संहितायाम्** |

**ससजुषो रुः** (८.२.६६) = पदान्ते सकारः अपि च पदान्ते सजुष् (मित्रम् इत्यर्थः), तयोः स्थाने रु–आदेशो भवति | सश्च सजुश्च ससजुषौ, तयोः ससजुषोः, इतरेतरद्वन्द्वः | ससजुषोः षष्ठ्यन्तं, रुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **ससजुषोर्** इति पदे रेफस्य लोपः (विसर्गसन्धिः) **रो रि** (८.३.१४) इति सूत्रेण | ससजुषोः 'पदस्य' इत्यस्य विशेषणम्; **येन विधिस्तदन्तस्य**

(१.१.७२) इत्यनेन तादृशम् पदं यस्य अन्ते सकारः अस्ति; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य स्थाने आदेशः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ससजुषोः पदस्य रुः** | **झलां जशोऽन्ते** (८.२.३९) इत्यस्य अपवादः |

**खरवसानयोर्विसर्जनीयः** (८.३.१५) = खरि अवसाने च पदान्ते रेफस्य स्थाने विसर्गादेशो भवति | खर् च अवसानं च खरवसाने तयोरितरेतरद्वन्द्वः, तयोः खरवसानयोः | खरवसानयोः सप्तम्यन्तं, विसर्जनीयः प्रथमान्तं, द्विपदमिदं सूत्रम् | **रो रि** (८.३.१४) इत्यस्मात् **रः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | रः 'पदस्य' इत्यस्य विशेषणम्; **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् पदं यस्य अन्ते रेफः अस्ति; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य स्थाने आदेशः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **रः पदस्य विसर्जनीयः खरवसानयोः संहितायाम्** |

४. <u>विधिलिङ्–लकारः</u>

विधिलिङि सिद्ध–तिङ्प्रत्ययाः—

इत् इताम् इयुः
इः इतम् इत
इयम् इव इम

**आद्गुणः** (६.१.८७) = विधिलिङि सर्वत्र प्रसक्तिः

कार्यम्—

पठ + इत् = पठेत् **आद्गुणः** (६.१.८७) [अपि च अग्रे सर्वत्र]
पठ + इताम् = पठेताम्
पठ + इयुः = पठेयुः
पठ + इः = पठेः
पठ + इतम् = पठेतम्
पठ + इत = पठेत
पठ + इयम् = पठेयम्
पठ + इव = पठेव
पठ + इम = पठेम

**आद्गुणः** (६.१.८७) = अ–वर्णात् अचि परे पूर्वपरयोः स्थाने गुणसंज्ञकः एकादेशः स्यात् | अत्र **अचि परे** इत्यस्य **इकि परे** इति फलितः अर्थः यतः अकारात् अकारः चेत् कार्यं बाधितम् **अकः सवर्णे दीर्घः** इत्यनेन; अकारात् एच् चेत् कार्यं बाधितं **वृद्धिरेचि** इत्यनेन सूत्रेण च | आत् पञ्चम्यन्तं, गुणः प्रथमान्तं, द्विपदमिदं सूत्रम् | **इको यणचि** (६.१.७७) इत्यस्मात् **अचि** इत्यस्य

अनुवृत्तिः; **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्— **आत् अचि पूर्वपरयोः एकः गुणः संहितायाम्** |

**B.** <u>आत्मनेपदे अङ्ग–तिङ्प्रत्यय–संयोजनम्</u>

आत्मनेपदे धातुः = एध्, अङ्गम् = एध

१. <u>लट्–लकारः</u>

लटि सिद्ध–तिङ्प्रत्ययाः—
ते इते अन्ते
से इथे ध्वे
ए वहे महे

कार्यम्—
एध + ते = एधते
एध + इते = एधेते **आद्गुणः** (६.१.८७)
एध + अन्ते = एधन्ते **अतो गुणे** (६.१.९७)
एध + से = एधसे
एध + इथे = एधेथे **आद्गुणः** (६.१.८७)
एध + ध्वे = एधध्वे
एध + ए = एधे **अतो गुणे** (६.१.९७)
एध + वहे = एधावहे **अतो दीर्घो यञि** (७.३.१०१)
एध + महे = एधामहे **अतो दीर्घो यञि** (७.३.१०१)

२. <u>लोट्–लकारः</u>

लोटि सिद्ध–तिङ्प्रत्ययाः—
ताम् इताम् अन्ताम्
स्व इथाम् ध्वम्
ऐ आवहै आमहै

कार्यम्—
एध + ताम् = एधताम्

एध + इताम् = एधेताम्  **आद्गुणः** (६.१.८७)

एध + अन्ताम् = एधन्ताम्  **अतो गुणे** (६.१.९७)

एध + स्व = एधस्व

एध + इथाम् = एधेथाम्  **आद्गुणः** (६.१.८७)

एध + ध्वम् = एधध्वम्

एध + ऐ = एधै  **वृद्धिरेचि** (६.१.८८)

एध + आवहै = एधावहै  **अकः सवर्णे दीर्घः** (६.१.१०१)

एध + आमहै = एधामहै  **अकः सवर्णे दीर्घः** (६.१.१०१)

३. लङ्–लकारः

लङि सिद्ध–तिङ्प्रत्ययाः—

त  इताम्  अन्त

थाः  इथाम्  ध्वम्

इ  वहि  महि

आ + एध = ऐध इति अङ्गम्  **आडजादीनाम्** (६.४.७२), **आटश्च** (६.१.९०)

कार्यम्—

ऐध + त = ऐधत

ऐध + इताम् = ऐधेताम्  **आद्गुणः** (६.१.८७)

ऐध + अन्त = ऐधन्त  **अतो गुणे** (६.१.९७)

ऐध + थाः = ऐधथाः

ऐध + इथाम् = ऐधेथाम्  **आद्गुणः** (६.१.८७)

ऐध + ध्वम् = ऐधध्वम्

ऐध + इ = ऐधे  **आद्गुणः** (६.१.८७)

ऐध + वहि = ऐधावहि  **अतो दीर्घो यञि** (७.३.१०१)

ऐध + महि = ऐधामहि  **अतो दीर्घो यञि** (७.३.१०१)

**आडजादीनाम्** (६.४.७२) = लुङ् लङ् लृङ् च परं चेत्, अजादिधातुरूपि–अङ्गस्य आट्–आगमो भवति; स च आडागमः उदात्त–संज्ञकः | **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन अङ्गात् प्राक् आयाति | अच् आदिर्येषां ते, अजादयः बहुव्रीहिः; तेषाम् अजादीनाम् | आट् प्रथमान्तम्, अजादीनाम् षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **लुङ्लङ्लृङ्क्ष्वडुदात्तः** (६.४.७१) इत्यस्मात् **लुङ्लङ्लृङ्क्षु**, **उदात्तः** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अजादीनाम् अङ्गस्य आट् उदात्तः लुङ्लङ्लृङ्क्षु** |

**आटश्च** (६.१.९०) = आडागमात् अचि परे पूर्वपरयोः वृद्धिरेकादेशो भवति | आटः पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **इको यणचि** (६.१.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः | **वृद्धिरेचि** (६.१.८८) इत्यस्मात् **वृद्धिः** इत्यस्य अनुवृत्तिः | **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति-सहितसूत्रम्— **आटः च अचि पूर्वपरयोः एकः वृद्धिः संहितायाम्** |

धेयं यत् उपरितने उदाहरणे एध्-धातोः आदौ एकारः अस्ति अतः आ + ए → ऐ इति वृद्धिः तु भवति एव | परन्तु धातुः इकारादिः उकारादिः वा चेत्, आ + इ / आ + उ → गुणः भवति स्म | एतदर्थम् **आटश्च** (६.१.९०) इत्यनेन वृद्धिः भवति न तु गुणः | यथा परस्मौपदे, तुदादिगणे इष्-धातुः, **इषुगमियमां छः** (७.३.७७) इति सूत्रेण वक्ष्यमाणेन धात्वादेशेन शिति परे षकारस्य स्थाने छकारः, इष् + श → अङ्गम् इच्छ | लटि इच्छति; लङि आडागमं कृत्वा आ + इच्छ | अत्र सामान्यगुणसन्धिना **आद्गुणः** (६.१.८७) इत्यनेन 'एच्छत्' इति भवति स्म | परन्तु अत्र **आटश्च** (६.१.९०) इत्यनेन परत्वात् वृधिरादेशो भवति इति कृत्वा ऐच्छत् |

४. <u>विधिलिङ्-लकारः</u>

विधिलिङि सिद्ध-तिङ्प्रत्ययाः—

ईत ईयाताम् ईरन्
ईथाः ईयाथाम् ईध्वम्
ईय ईवहि ईमहि

**आद्गुणः** (६.१.८७) = विधिलिङ्गि सर्वत्र प्रसक्तिः

कार्यम्—

एध + ईत = एधेत **आद्गुणः** (६.१.८७) [अपि च अग्रे सर्वत्र]
एध + ईयाताम् = एधेयाताम्
एध + ईरन् = एधेरन्
एध + ईथाः = एधेथाः
एध + ईयाथाम् = एधेयाथाम्
एध + ईध्वम् = एधेध्वम्
एध + ईय = एधेय
एध + ईवहि = एधेवहि
एध + ईमहि = एधेमहि

इति सार्वधातुकलकारेषु अदन्ताङ्ग-तिङ्प्रत्यययोः संयोजनम् | फलं क्रियापदमिति |